# 209

**I**

Total No. of Questions : 16

Total No. of Printed Pages : 4

Reg. No. | | | | | | | | | |

## Part – II
## SANSKRIT
## Paper – II
## (Second Language)

Time : 3 Hours Max. Marks : 100

**Note :** (1) **ALL** questions should be attempted.

(2) Question Nos. **1**, **2** and **3** should be answered either in the medium of instructions of the candidate or in **Sanskrit** (Devanagari script).

(3) The remaining questions should be answered in **Sanskrit** (Devanagari script) only.

**निर्देश : प्रथम, द्वितीय, तृतीय** – प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः **संस्कृत**भाषायामेव समाधातव्याः ।

**1. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत ।** **(1×8=8)**

(अ) उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृतः ।।

(आ) दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञाता ।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः ।।

**2. एकं निबन्ध प्रश्नं समाधत्त ।** **(1×6=6)**

(अ) ''विभीषणोपदेशः'' इति पाठ्यभाग सारांशं लिखत ।

(आ) गीर्वाणवाण्याः वैभवं लिखत ।

**3. एकं निबन्ध प्रश्नं समाधत्त ।** **(1×6=6)**

(अ) ''मन्दविषसर्प कथा'' इति पाठ्यभागस्य सारांशं लिखत ।

(आ) ''भिषजः भैषज्यम्'' इति पाठ्यभागस्य सारांशं लिखत ।

4. त्रयाणां प्रश्नानां समाधानानि लिखत । (3×2=6)

(अ) "कर्णभारम्" केन विरचितम् ?

(आ) भृगुवंशकेतुः कः ?

(इ) बालानां कलहः कीदृशः ?

(ई) केन द्रुपदः गर्वान्ध जातः ?

(उ) "द्रोण द्रुपदयोः सम्बन्धः कीदृशः ?

(ऊ) नृपश्रियः कीदृशाः ?

5. द्वयोः ससन्दर्भं व्याख्यानं लिखत । (2×3=6)

(अ) अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।

(आ) वदेत् क्षमं स्वामिहितं च मन्त्री ।

(इ) वाच्याः कथं मातृपदेन चान्थाः ।

(ई) सा संस्कृताख्या सुकृतैकलभ्या ।

6. द्वयोः ससन्दर्भं व्याख्यानं लिखत । (2×3=6)

(अ) निवृत्तरागस्य गृहं तपोवनम् ।

(आ) सुपुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना ।

(इ) वैद्योऽपि मानव एव ।

(ई) विवाहो नाम वणिग्व्यवहार एव ।

7. त्रयाणां प्रश्नानां समाधानानि लिखत । (3×2=6)

(अ) कदा प्रभृति अशुभानि निमित्तानि दृश्यन्ते ?

(आ) पृथिव्यां त्रीणि रत्नानि कानि ?

(इ) परोपदेशसमये जनाः सर्वेऽपि कीदृशाः भवन्ति ?

(ई) लोके चित्रमतिः कः ?

(उ) सीता कीदृशी ?

(ऊ) व्याधितस्य मित्रं किम् ?

8. त्रयाणां प्रश्नानां समाधानानि लिखत । (3×2=6)

(अ) मन्दविषो नाम सर्पः कुत्र वसति ?

(आ) ब्राह्मणं प्रति तत्प्रेयसी किं जगाद् ?

(इ) राजहंसः कः ? तस्य नगरी का ?

(ई) मञ्जुहासिनी का ?

(उ) हितोपदेशे कति भागाः सन्ति ? ते च के ?

(ऊ) धर्मपालस्य कति पुत्राः ? ते च के ?

**9. एकेन पदेन समाधानं लिखत ।** **(5×1=5)**

(अ) सुखधर्मनाशनं केन भवति ?

(आ) सर्वत्र का पूज्यते ?

(इ) केन सर्वे वशाः भवन्ति ?

(ई) देहे सदा प्राणा इव का अस्ति ?

(उ) केषां बलानि अमेयानि ?

**10. एकेन पदेन समाधानं लिखत ।** **(5×1=5)**

(अ) मण्डूकनाथः कः ?

(आ) ''विक्रमार्कचरितम्'' केन विरचितम् ?

(इ) राजवाहनः कस्य पुत्रः ?

(ई) ''भिषजः भैषज्यम्'' इति पाठ्यांशः केन विरचितः ?

(उ) ''हितोपदेशः'' केन विरचितः ?

**11. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त ।** **(5×1=5)**

कस्मिंचित् वनोद्देशे करालकेसरो नाम सिंहः प्रतिवसति स्म । तस्य दूसरको नाम सृगालः सदैवानुयायी परिचारिकोऽस्ति । अथ कदाचित् तस्य हस्तिना सह युध्यमानस्य शरीरे गुरुतरा प्रहारः सञ्जाताः यै पदमेकमपि चलितुं न शक्नोति । तस्य अचलनाच्च धूसरकः क्षुत्क्षामकण्ठो दौर्बल्यं गतः । अन्यस्मिन्नहानि तमवोचत् – ''स्वामिन् ! बुभुक्षया पीडितोऽहम् । पदात्पदमपि चलितुं न शक्नोमि । तत्कथं ते शुश्रूषां करोमि'' । सिंहः आह – ''भोः ! गच्छ । अन्वेषय किञ्चित् सत्वम् । येनमाम् अवस्थां गतोऽपि व्यापादयामि ।

प्रश्नाः –

(अ) सिंहस्य नाम किम् ?

(आ) परिचारकः कः ?

(इ) सृगालः येनसह युद्धं कृतवान् ?

(ई) धूसरकः सिंहं प्रति किमब्रवीत् ?

(उ) सिंह सृगालं प्रति किमाह ?

12. नामनिर्देशपूर्वकं त्रीणि सन्धत्त । (3x2=6)

(अ) शरत् + चन्द्र:

(आ) पेस् + टा

(इ) अच् + अन्त:

(ई) षठ् + मुख:

(उ) स: + अपि

(ऊ) पितु: + इच्छा

13. नामनिर्देशपूर्वकं त्रीणि विघटयत । (3x2=6)

(अ) सज्जन:

(आ) तट्टीका

(इ) वागीश:

(ई) जगन्नाथ:

(उ) कोऽपि

(ऊ) हरिर्गच्छति

14. द्वयो: शब्दयो: सविभक्ति रूपाणि लिखत । (2x6=12)

(अ) राजन् (आ) वाच् (इ) महत् (ई) यद् (पुं)

15. समासनामनिर्देशपूर्वकं त्रयाणां विग्रह वाक्यानि लिखत । (3x2=6)

(अ) कृष्णाश्रित:

(आ) अल्पवात:

(इ) नवरात्रम्

(ई) शिवकेशवौ

(उ) यथाशक्ति:

(ऊ) महाबल:

16. अधोनिर्दिष्ट पट्टिकामाधारीकृत्य पञ्च साधुरूपाणि लिखत । (5x1=5)

| | | |
|---|---|---|
| गणेश: | सत्यं | खादिष्यति |
| कृष्ण: | फलं | करिष्यति |
| त्वं | ग्रामं | पठिष्यामि |
| राम: | कदा | वदिष्यति |
| अहं | पाठं | गमिष्यामि |